No. of Printed Pages/Questions: 9/ 17

# O. P. JINDAL SCHOOL, SAVITRI NAGAR

**Annual Examination (2025 – 2026)**

**Class: VI** **MM: 80**

**Subject: Sanskrit** **Time: 3. Hrs.**

Name: ________________________ Class / Section: _________ Roll No.:___________

***Fifteen Minutes Extra will be for reading the Question Paper.***

निर्देशाः1) प्रश्नपत्रे चत्वारि खण्डानि सन्ति।

खण्ड 'क' अपठित अवबोधनम् (10 अङ्काः)
खण्ड 'ख' रचनात्मकं कार्यम् (15 अङ्काः)
खण्ड 'ग' अनुप्रयुक्त व्याकरणम् (25 अङ्काः)
खण्ड 'घ' पठित–अवबोधनम् (30 अङ्काः)

2) सर्वे प्रश्नाः अनिवार्याः।
3) प्रश्नानाम् उत्तराणि खण्डानुसारं क्रमेणैव लेखनीयानि।
4) प्रश्न संख्या अवश्यं लेखनीयाः।
5) उत्तराणि संस्कृतेन एव लेखनीयानि।

---

## खण्ड 'क' अपठित–अवबोधनम्

**प्र01 निम्नलिखितं गद्यांशं ध्यानेन पठित्वा प्रश्नानाम् उत्तराणि लिखत–**

(निम्नलिखित गद्यांश को ध्यानसे पढ़कर निर्देशानुसार प्रश्नों के उत्तर दीजिए)

अस्माकं राष्ट्रीय – पुष्पम् कमलम् अस्ति। अस्य सौन्दर्यम् अद्वितीयम् अस्ति। अस्य अनेके वर्णाः भवन्ति। यथा – नीलः, पीतः, रक्तः, श्वेतः, च। अस्य उत्पत्तिः विशेषतः पङ्के एव भवति, परम् एतत् सर्वदा जलस्य उपरि विकसति। कमलपुष्पस्य अन्य नाम पद्म अस्ति। यस्मिन् तडागे कमलानि विकसन्ति सः तडागः अति सुन्दरः दृश्यते। कमलेन एव तडागः बिभाति। भ्रमरः रात्रौ कमलपुष्पे एव स्वपिति।

**I. एकपदेन उत्तरत–** (एक पद में उत्तर दीजिए) **(½X2=1)**

**(क)** अस्माकं राष्ट्रीय–पुष्पम् किम् अस्ति ?

**(ख)** कमलस्य उत्पत्तिः कुत्र भवति ?

**II एकवाक्येन उत्तरत–**(एकवाक्य में उत्तर दीजिए) **(2X2=4)**

**(क)** कमलं कस्य उपरि विकसति ?

**(ख)** तडागः कथं सुन्दरः दृश्यते ?

**III गद्यांशस्य एकम् उचितं शीर्षकं लिखत–** (गद्यांश का उचित शीर्षक लिखिए) **(1X1=1)**

**IV निर्देशानुशारम् उत्तरत–** (निर्देशानुसार उत्तर दीजिए) **(1X4=4)**

**(क)** 'वर्णाः' इति पदस्य किं **विशेषणपदम्** अत्र प्रयुक्तम् ?

(अ) अनेकम् (ब) अनेकाः

(स) अनेके (द) अनेकानि

(ख) 'उत्पत्ति' अस्य किं **क्रियापदम्** अत्र प्रयुक्तम ?

(अ) भवसि (ब) भवतः

(स) भवन्ति (द) भवति

(ग) 'कृष्णवर्णः' अस्य किं **विलोम**पदम् अत्र प्रयुक्तम् ?

(अ) श्वेतवर्णम् (ब) श्वेतवर्णस्य

(स) श्वेतवर्णेन (द) श्वेतवर्णः

(घ) 'कमलम् जलस्य उपरि विकसति' अस्मिन् वाक्ये किम् **अव्यय**पदम् प्रयुक्तम ?

(अ) उपरि (ब) विकसन्ति

(स) जलस्य (द) कमलम्


## खण्ड–'ख' रचनात्मकं–कार्यम्

**प्र02 अधोदत्तंचित्रं दृष्ट्वा मंजूषायाः सहायतया संस्कृतेन पंचवाक्येषु वर्णनं कुरुत–**

( चित्र को देखकर मंजूषा की सहायता से संस्कृत में पाँच वाक्यों में वर्णन कीजिए ) **(1X5=5)**

**मञ्जूषा** –

| |
|---|
| जनः, वृक्षस्य, खेलति, नीचैः, कन्दुकेन, आपणम्, सन्ति, बालाः, क्रीणाति, चित्रं, बालः, |



प्र0 3 निम्नलिखितानां संस्कृत वाक्यानाम् हिंदी भाषायाम् अनुवादं कुरुत–(कोई पाँच) (1X5=5)

(निम्नलिखित किन्हीं **पाँच** वाक्यों का हिंदी भाषा में अनुवाद कीजिए)

i त्वं किम् इच्छसि ?

ii मम माता वदति यत् वृक्षाः पूज्याः भवन्ति।

iii अतिथि अस्माकं देवः अस्ति।

iv एकस्मिन् वने एकः सरोवरः अस्ति।

v स्वरक्षार्थं च ते उपायं चिन्तयन्ति।

vi यः परिश्रमं करोति, सः एव सफलतां प्राप्नोति।

vii हस्त वदति, मम कारणेन माधवः लिखति।

प्र0 4 अधोलिखितं संवादं मंजूषायां प्रदत्त शब्दैः पूरयित्वा पुनः लिखत– (1X5=5)

(निम्नलिखित वार्तालाप को मंजूषा से उचित शब्द चुनकर पुनः लिखिए )

पिता – त्वं किं पठसि ?

पुत्रः – एकं (1) ——— ।

पिता – लेखस्य विषयः कः ?

पुत्रः – व्यायामः।

पिता – शोभनः (2) ———।

पुत्रः – अस्मिन् लेखे प्रातः व्यायामेन के लाभाः सन्ति इति विस्तृतरूपेण लिखिताः।

पिता – तदा तु त्वम् अवश्यम् एव (3) ———।

पुत्रः – अहं न केवलं (4) ——— अपितु स्वजीवने (5) ———अपि।

**मञ्जूषा** –

| |
|---|
| पालयिष्यामि, लेखम्, विषयः, पठ, पठिष्यामि |

## खण्ड– 'ग' अनुप्रयुक्तव्याकरणम्

प्र0 5 अधोलिखित रेखांकितपदानां सन्धि–विच्छेदं विकल्पेभ्यः चित्वा लिखत– *(कोई पाँच)* (1x5=5)

(निम्नलिखित रेखांकितपदों के सन्धि–विच्छेद उचित विकल्प चुनकर उत्तर लिखिए)

i मम <u>विद्यालयः</u> सावित्रीनगरे अस्ति।

(क) विद्य + आलयः (ख) विद् + आलयः

(ग) विद्या + आलयः (घ) विद्याआ + लयः

ii <u>सोम + इद्रः</u> गृहं गच्छति।

(क) सोमेद्रः (ख) सोमाद्रः

(ग) सोमइद्रः (घ) सोमोद्रः

iii <u>गिरीशः</u> षष्ठी कक्षायां पठति।

(क) गिर + ईशः (ख) गिरि + इशः

(ग) गिर + ईशम् (घ) गिरि + ईशः

iv **<u>हित + उपदेशः</u>** लाभकारी भवति।

(क) हितोपदेशः (ख) हितउपदेशः

(ग) हितापदेश (घ) हीतोपदेयः

v दलस्य **<u>नायकः</u>** अग्रे चलति।

(क) नै + अकः (ख) ने + अकः

(ग) न + आयकः (घ) ना + यकः

vi **<u>हिम + आलयः</u>** भारतस्य उत्तरदिशायां अस्ति।

(क) हिमालेयः (ख) हिमालयः

(ग) हीमालयः (घ) हेमालयः

**प्र0 6 अधोलिखितवाक्येषु विकल्पेभ्यः उचित–अव्ययपदं चित्वा रिक्तस्थानानि पूरयत–***(कोई चार)*

(निम्नलिखित वाक्यों में से उचित विकल्प चुनकर रिक्तस्थान पूरा कीजिए) **(1x4=4)**

i सिंहः ––––––– गर्जति।

(क) नीचैः (ख) उच्चैः

(ग) मन्दम् (घ) उपरि

ii कच्छपः ––––––– चलति।

(क) शनैः (ख) शीघ्रम्

(ग) तीव्रम् (घ) अन्तः

iii काष्ठफलकस्य ––––––– पुस्तकम् अस्ति।

(क) उपरि (ख) बहिः

(ग) कोणे (घ) कुत्र

iv जलम् –––––– वहति।

(क) नीचैः (ख) उच्चैः

(ग) न (घ) तथा

v यत्र धूमः –––––– अग्निः।

(क) तत्र (ख) यथा

(ग) यदा (घ) कुत्र

प्र0 7 **अधोलिखितवाक्येषु विकल्पेभ्यः उचित–शब्दरूपं चित्वा रिक्तस्थानानि पूरयत**–*(कोई चार)*
(निम्नलिखित वाक्यों में विकल्पों से उचित शब्दरूप चुनकर रिक्तस्थान पूरा कीजिए) **(1x4=4)**

i पिता ——— वदति।
(क) बालकः (ख) बालकेन
(ग) बालकम् (घ) बालाय

ii ——— खेलन्ति।
(क) बालम् (ख) बालाः
(ग) बालस्य (घ) बालेन

iii तत्र ——— सन्ति।
(क) छात्रः (ख) छात्राः
(ग) छात्रा (घ) छात्रेण

iv ——— शोभा अद्वितीया अस्ति।
(क) पुष्पाणाम् (ख) पुष्पैः
(ग) पुष्पाणि (घ) पुष्पेण

v रामः ——— अगच्छत्।
(क) वनम् (ख) वने
(ग) वनस्य (घ) वनयोः

प्र0 8 **अधोलिखितवाक्येषु विकल्पेभ्यः उचितं–क्रियापदं चित्वा रिक्तस्थानानि पूरयत**–*(कोई पाँच)*
(निम्नलिखित वाक्यों में विकल्प से उचित धातुरूप चुनकर रिक्तस्थान पूरा कीजिए) **(1x5=5)**

i प्रातः द्वौ जनौ मार्गे भ्रमणं ———।
(क) करोति (ख) कुरुतः
(ग) करोमि (घ) करोसि

ii त्वम् तीव्रम् ———।
(क) गच्छसि (ख) गच्छति
(ग) गच्छामः (घ) गच्छतः

iii अहम् कदाचित् क्रुद्धः ———।
(क) भवामि (ख) भवति
(ग) भवसि (घ) भवावः

iv युवाम् किम् ——— ?
(क) लिखति (ख) लिखथः
(ग) लिखतः (घ) लिखामः

v ताः बालिकाः क्रीडाक्षेत्रे ———।
(क) क्रीडति (ख) क्रीडन्ति
(ग) क्रीडामः (घ) क्रीडतः

vi बालकाः व्ययामं ———।
(क) कुर्वन्ति (ख) करोति
(ग) कुरुतः (घ) कुर्वः

प्र0 9 अधोलिखितवाक्येषु विकल्पेभ्यः उचितं–संख्यापदं चित्वा रिक्तस्थानानि पूरयत–*(कोई पाँच)*

(निम्नलिखित वाक्यों में विकल्प से उचित संख्यापद चुनकर रिक्तस्थान पूरा कीजिए) **(1x5=5)**

i ————(4) कन्याः खेलन्ति।

(क) चत्वारः (ख) चतस्त्रः

(ग) चत्वारि (घ) चतुर्

ii ———— (2) महिले पचतः।

(क) द्वे (ख) द्वौ

(ग) द्वि (घ) द्वयम्

iii ———— (4) बालकः खेलन्ति।

(क) चत्वारः (ख) चतस्त्रः

(ग) चत्वारि (घ) चतुरा

iv ———— (1) फलम् पतति।

(क) एकम् (ख) एकः

(ग) एका (घ) एकेन

v ———— (3) पुस्तकानि सन्ति ।

(क) त्रीणि (ख) त्रयः

(ग) तिस्त्रः (घ) त्रीन्

vi ———— (4) महिलाः नृत्यन्ति ।

(क) चत्वारः (ख) चतस्त्रः

(ग) चत्वारि (घ) चतुर्भ्यः

प्र0 10 अधोलिखित प्रश्नेषु कोष्ठकात् शुद्धरूपं चित्वा रिक्तस्थानानि पूरयत–(कोई चार) **(½X4=2)**

(निम्नलिखित प्रश्नों में कोष्ठक से शुद्धरूप चुनकर के रिक्तस्थानों को पूरा कीजिए)

क) ———— आपणं गच्छति। (सः / तत्)

ख) ———— कुत्र गच्छसि ? (अहम् / त्वम्)

ग) ———— कुत्रापि न अस्मि। ( अहम् / सः)

घ) किम् ———— अत्र एव तिष्ठसि ? (त्वम् / सा )

ङ) आम् ———— अत्र एव तिष्ठामि। (अहम् / त्वम्)

## खण्ड–'घ' पठित–अवबोधनम्

**प्र0 11 निम्नलिखितं गद्यांशं ध्यानेन पठित्वा प्रश्नानाम् उत्तराणि लिखत–**

(निम्नलिखित गद्यांश को ध्यान से पढ़कर निर्देशानुसार प्रश्नों के उत्तर दीजिए)

एकस्मिन् विशाले ग्रामे कश्चन भिक्षुकः आसीत्। यद्यपि सः उन्नतः दृढकायः च युवकः आसीत् तथापि सः भिक्षाटनं करोति स्म। मार्गे यः कोऽपि मिलति तं सः कथयति– "कृपया भिक्षां यच्छतु। दरिद्राय दानं करोतु। पुण्यं प्राप्नोतु।" इति। केचन जनाः तस्मै धनं यच्छन्ति। केचन च तर्जयन्ति।

एकदा तेन मार्गेण कश्चित् धनिकः आगच्छति। सः भिक्षुकः मनसि एव चिन्तयति– "अहो मम भाग्यम्। अद्य अहं प्रभूतं धनं प्राप्नोमि" इति।

I **एकपदेन उत्तरत–** (कोई दो प्रश्नों का एकपद में उत्तर दीजिए) (½X2=1)

i भिक्षुकः किं करोति स्म ?

ii तेन मार्गेण कश्चित् कः आगच्छति ?

iii भिक्षुकः धनिकात् किं यच्छति ?

II **पूर्णवाक्येन उत्तरत–**( कोई दो प्रश्नों का पूर्णवाक्य में उत्तर दीजिए) (1X2=2)

i भिक्षुकः कीदृशः (कैसा था) आसीत् ?

ii सः भिक्षुकः मनसि किं चिन्तयति ?

iii मार्गे यः कोऽपि मिलति तं सः किं कथयति ?

III **निर्देशानुसारम् उत्तरत–** (निर्देशानुसार **दो प्रश्नों** के उत्तर दीजिए) (1X2=2)

i 'ग्रामे' इति शब्दस्य कः अर्थः ?

क) गांव में ख) शहर में ग) रास्ते में

ii 'करोति' इति पदे कः पुरुषः अस्ति ?

क) प्रथमपुरुषः ख) मध्यमपुरुषः ग) उत्तमपुरुषः

iii 'सः भिक्षुकः मनसि एव चिन्तयति' अस्मिन् वाक्ये अव्ययपदम् किम् ?

क) भिक्षुकः ख) एव ग) मनसि

**प्र0 12 अधोलिखितं श्लोकम् ध्यानेन पठित्वा प्रश्नानाम् उत्तराणि लिखत–**

(निम्नलिखित श्लोक को ध्यान से पढ़कर निर्देशानुसार प्रश्नों के उत्तर दीजिए)

**उद्यमेन हि सिध्यन्ति कार्याणि न मनोरथैः।**
**न हि सुप्तस्य सिंहस्य प्रविशन्ति मुखे मृगाः।**

I **एकपदेन उत्तरत–** (एकपद में उत्तर दीजिए) (½X2=1)

i कार्याणि केन सिध्यन्ति ?

ii मनोरथैः किं न सिध्यन्ति ?

II पूर्णवाक्येन उत्तरत–(पूर्णवाक्य में उत्तर दीजिए) (1x2=2)

i मृगाः स्वयमेव कस्य मुखे न प्रविशन्ति ?

ii उद्यमेन किम् भवति ?

III निर्देशानुसारम् उत्तरत– (निर्देशानुसार **दो प्रश्नों** के उत्तर दीजिए) (1x2=2)

i 'प्रविशन्ति' इति क्रिया पदस्य कर्ता पदं किम् ?

क) मृगाः ख) सिंहः ग) मुखे

ii 'परिश्रमेण' इति पदस्य पर्यायवाची पदं किम् ?

क) सुप्तस्य ख) उद्यमेन ग) मनोरथैः

iii 'सुप्तस्य' इति पदे का विभक्तिः अस्ति ?

क) पंचमी ख) षष्ठी ग) सप्तमी

**प्र0 13 अधोलिखितं नाट्यांशं ध्यानेन पठित्वा प्रश्नानाम् उत्तराणि लिखत–**

(निम्नलिखित नाट्यांश को ध्यान से पढ़कर निर्देशानुसार प्रश्नों के उत्तर दीजिए)

**अम्बा** – राकेश! कुत्र असि ? अत्र आगच्छ।

**राकेशः** – आम् अम्ब! कथय किं कार्यं करवाणि।

**अम्बा** – अद्य तव तातः कार्यालयात् विलम्बेन आगमिष्यति। त्वम् आपणं गच्छ। वस्तूनि आनय वस्तूनां नामावली अपि अत्र अस्ति।

**राकेशः** – अस्तु! स्यूतं ददातु। वस्तूनां नामावलीम् अहं स्वीकरोमि।

**अम्बा** – स्वीकुरु। धनम् अपि नय।

**राकेशः** – अम्ब! इतोऽपि एकं वस्तु स्वीकरवाणि ?

**अम्बा** – चाकलेहम् इच्छति खलु वत्स! जानातु , अधिकं चाकलेह–खादनं स्वास्थ्याय हानिकरं भवति।

I एकपदेन उत्तरत– (½x2=1)

i कः आपणं गच्छति ?

ii राकेश! कुत्र असि ? इति का पृच्छति ?

II पूर्णवाक्येन उत्तरत– (2x1=2)

i कार्यालयात् विलम्बेन कः आगमिष्यति ?

ii किं खादनं स्वास्थ्याय हानिकरं भवति ?

III निर्देशानुसारम् उत्तरत – (1x2=2)

i 'माता' इति पदस्य पर्यायवाची पदं किम् ?

क) तातः ख) अम्बा ग) अहम्

ii 'अपि' इति अव्यय पदस्य कः अर्थः ?

क) भी ख) ही ग) नहीं

iii 'अहम्' इति पदे किम् वचन अस्ति ?

क) एकवचनं ख) द्विवचनं ग) बहुवचनं

**प्र0 14 निम्नलिखित प्रश्नानां उत्तराणि लिखत**– (किन्ही पाँच प्रश्नों के उत्तर के लिखिए) **(1X5=5)**

i श्रीरामस्य गुरुः कः आसीत् ?

ii अर्जुनस्य गुरुः कः आसीत् ?

iii रामायणस्य रचयिता कः आसीत् ?

iv पंचतन्त्रस्य रचयिता कः आसीत् ?

v श्रीकृष्णस्य पत्नी का आसीत् ?

vi उर्मिलायाः पतिः कः आसीत् ?

**प्र0 15 उपयुक्तेन अर्थेन सह योजयत**– (पदों को उचित अर्थ से मिलाइए) **(½X6=3)**

| | |
|---|---|
| (1) नूतनाः | (क) परिश्रमेण |
| (2) वारं वारं | (ख) आहरः |
| (3) शशाङ्कः | (ग) जलाशयः |
| (4) सरोवरः | (घ) चन्द्रः |
| (5) आनयः | (ङ) पुनः पुनः |
| (6) उद्यमेन | (च) नवीनाः |

**प्र0 16 अधोलिखितप्रश्नानां कोष्ठकात् समुचितं पदं चित्वा वाक्यानि रचयन्तु**–(कोई चार) **(1X4=4)**
(निम्नलिखित वाक्यों को कोष्ठक से उचितपद चुनकर निर्देशानुसार पूरा कीजिए)

i अहम् ------ गायनं करोमि। (पादेन, नासिकया, मुखेन)

ii अहम् ------- धावनं करोमि। (पादाभ्यां, ललाटेन, कूर्परेण)

iii अहम् ------- आघ्राणं करोमि। (नखैः, नासिकया, चरणेन)

iv अहम् ------- श्रवणं करोमि। (कर्णाभ्याम्, नासिकया, अंगुष्ठैः)

v अहम् ------- भोजनं करोमि। (पादेन, नासिकया, मुखेन)

**प्र0 17 निम्नलिखितानां प्रश्नानाम् उत्तराणि 'आम्' अथवा 'न' इति पदेन लिखन्तु**– **(½X6=3)**
(निम्नलिखित प्रश्नों के उचित कथन में 'आम्' तथा अनुचित कथन में 'न' लिखिए )

(क) ग्रामे कश्चन भिक्षुकः आसीत्। ------

(ख) जनाः तस्मै दण्डं यच्छन्ति। ------

(ग) भिक्षुकः भिक्षाटनं त्यजति। ------

(घ) भिक्षुकः धनिकाय पादौ ददाति। ------

(ङ) भिक्षुकः प्रभूतं धनम् इच्छति। ------

(च) भिक्षुकः उन्नतः दृढकायः च आसीत्। ------

---000---